# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ८५

हन्यमाने बले तूर्णमन्योन्यं ते महामृधे ।
सरसीव महाघर्मे सूपक्षीणे बभूवतुः ॥ १॥

स्वबलस्य विघातेन विरूपाक्षवधेन च ।
बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥ २॥

प्रक्षीणं तु बलं दृष्ट्वा वध्यमानं वलीमुखैः ।
बभूवास्य व्यथा युद्धे प्रेक्ष्य दैवविपर्ययम् ॥ ३॥

उवाच च समीपस्थं महोदरमरिन्दमम् ।
अस्मिन्काले महाबाहो जयाशा त्वयि मे स्थिता ॥ ४॥

जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमम् ।
भर्तृपिण्डस्य कालोऽयं निर्वेष्टुं साधु युध्यताम् ॥ ५॥

एवमुक्तस्तथेत्युक्त्वा राक्षसेन्द्रं महोदरः ।
प्रविवेशारिसेनां स पतङ्ग इव पावकम् ॥ ६॥

ततः स कदनं चक्रे वानराणां महाबलः ।
भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः ॥ ७॥

प्रभग्नां समरे दृष्ट्वा वानराणां महाचमूम् ।
अभिदुद्राव सुग्रीवो महोदरमनन्तरम् ॥ ८॥

प्रगृह्य विपुलां घोरां महीधर समां शिलाम् ।
चिक्षेप च महातेजास्तद्वधाय हरीश्वरः ॥ ९॥

तामापतन्तीं सहसा शिलां दृष्ट्वा महोदरः ।
असम्भ्रान्तस्ततो बाणैर्निर्बिभेद दुरासदाम् ॥ १०॥

रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्रधा ।
निपपात शिलाभूमौ गृध्रचक्रमिवाकुलम् ॥ ११॥

तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्छितः ।
सालमुत्पाट्य चिक्षेप रक्षसे रणमूर्धनि ।
शरैश्च विददारैनं शूरः परपुरञ्जयः ॥ १२॥

स ददर्श ततः क्रुद्धः परिघं पतितं भुवि ।
आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन् ।
परिघाग्रेण वेगेन जघानास्य हयोत्तमान् ॥ १३॥

तस्माद्धतहयाद्वीरः सोऽवप्लुत्य महारथात् ।
गदां जग्राह सङ्क्रुद्धो राक्षसोऽथ महोदरः ॥ १४॥

गदापरिघहस्तौ तौ युधि वीरौ समीयतुः ।
नर्दन्तौ गोवृषप्रख्यौ घनाविव सविद्युतौ ॥ १५॥

आजघान गदां तस्य परिघेण हरीश्वरः ।
पपात स गदोद्भिन्नः परिघस्तस्य भूतले ॥ १६॥

ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात् ।
आयसं मुसलं घोरं सर्वतो हेमभूषितम् ॥ १७॥

तं समुद्यम्य चिक्षेप सोऽप्यन्यां व्याक्षिपद्गदाम् ।
भिन्नावन्योन्यमासाद्य पेततुर्धरणीतले ॥ १८॥

ततो भग्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः ।
तेजो बलसमाविष्टौ दीप्ताविव हुताशनौ ॥ १९॥

जघ्नतुस्तौ तदान्योन्यं नेदतुश्च पुनः पुनः ।
तलैश्चान्योन्यमाहत्य पेततुर्धरणीतले ॥ २०॥

उत्पेततुस्ततस्तूर्णं जघ्नतुश् च परस्परम् ।
भुजैश्चिक्षेपतुर्वीरावन्योन्यमपराजितौ ॥ २१॥

आजहार तदा खड्गमदूरपरिवर्तिनम् ।
राक्षसश्चर्मणा सार्धं महावेगो महोदरः ॥ २२॥

तथैव च महाखड्गं चर्मणा पतितं सह ।
जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः ॥ २३॥

तौ तु रोषपरीताङ्गौ नर्दन्तावभ्यधावताम् ।
उद्यतासी रणे हृष्टौ युधि शस्त्रविशारदौ ॥ २४॥

दक्षिणं मण्डलं चोभौ तौ तूर्णं सम्परीयतुः ।
अन्योन्यमभिसङ्क्रुद्धौ जये प्रणिहितावुभौ ॥ २५॥

स तु शूरो महावेगो वीर्यश्लाघी महोदरः ।
महाचर्मणि तं खड्गं पातयामास दुर्मतिः ॥ २६॥

लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुञ्जरः ।
जहार सशिरस्त्राणं कुण्डलोपहितं शिरः ॥ २७॥

निकृत्तशिरसस्तस्य पतितस्य महीतले ।
तद्बलं राक्षसेन्द्रस्य दृष्ट्वा तत्र न तिष्ठति ॥ २८॥

हत्वा तं वानरैः सार्धं ननाद मुदितो हरिः ।
चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः ॥ २९॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com